## ई हल्यघोः । (११३/२४९७)

श्नान्तानामङ्गानाम् अभ्यस्तानां च घुवर्जितानाम् आतः ईकारादेशो भवति हलादौ सार्वधातुके क्ङिति परतः । लुनीतः । पुनीतः । लुनीथः । पुनीथः । लुनीते । पुनीते । अभ्यस्तानाम्[1] – मिमीते । मिमीषे । मिमीध्वे[2] । संजिहीते । संजिहीषे । संजिहीध्वे[3] । हलि इति किम् ? लुनन्ति । मिमते[4] । अघोः इति किम् ? दत्तः । धत्तः । क्ङिति इत्येव, लुनाति । [5]जहाति ॥

## इद् दरिद्रस्य । (११४/२४८२)

[6]दरिद्रातेः हलादौ सार्वधातुके क्ङिति परतः इकारादेशो भवति । दरिद्रितः । दरिद्रिथः । दरिद्रिवः । दरिद्रिमः । हलि इत्येव, दरिद्रति । क्ङिति इत्येव, दरिद्राति ।

[७८९] दरिद्राते[7]रार्धधातुके लोपो वक्तव्यः । (म. भा. ३.२१७)

[७९०] सिद्धश्च प्रत्ययविधौ भवतीति वक्तव्यम् । (म. भा. ३.२१७)

दरिद्राति इति दरिद्रः । आकारान्तलक्षणो [8]णप्रत्ययो न भवति, पचादित्वादजेव[9] भवति ।

न दरिद्रायके लोपो दरिद्राणे च नेष्यते ।
दिदरिद्रासतीत्येके दिदरिद्रिषतीति वा (म.भा. ३.२१७) ॥

[७९१] अद्यतन्यां वेति वक्तव्यम्[10] ।

अदरिद्रीत्, अदरिद्रासीत् । दरिद्रस्य इति निर्देशे छान्दसं ह्रस्वत्वम् द्रष्टव्यम् ॥

## भियोऽन्यतरस्याम् । (११५/२४०२)

भी इत्येतस्या[11]ङ्गस्यान्यतरस्याम् इकारादेशो भवति हलादौ क्ङिति सार्वधातुके परतः । बिभितः, बिभीतः । बिभिथः, बिभीथः । बिभिवः, बिभीवः । बिभिमः, बिभीमः ।

[12]हलादौ इत्येव, बिभ्यति । क्ङिति इत्येव, बिभेति । सार्वधातुके इत्येव, भीयते[13] ॥

## जहातेश्च । (११६/२४०८)

जहातेश्च इकारादेशो भवति अन्यतरस्यां हलादौ क्ङिति सार्वधातुके परतः । जहितः, जहीतः । जहिथः, जहीथः । [14]हलादौ इत्येव, जहति । क्ङिति इत्येव, जहाति । सार्वधातुके इत्येव, हीयते । जेहीयते । पृथग्योगकरणमु[15]त्तरार्थम् ॥

---

1. खल्वपि इत्यधिकम् ह. 2. मिमीवहे मिमीमहे इत्यधिकम् फ. ह. 3: सञ्जिहीवहे सञ्जिहीमहे इत्यधिकम् फ. ह. 4. लुनते पुनते इत्यधिकम् फ. 5. पुनाति फ. 6. दरिद्रा इत्येतस्य फ. 7. असार्वधातुके नास्ति फ. 8. ण नास्ति क. 9. एव नास्ति फ. 10. लुङः एषा सञ्ज्ञा पूर्वाचार्याणाम् इत्यधिकम् फ. 11. अङ्गस्य क. 12. हलादौ – भीयते नास्ति ब. क. 13. बेभीयते इत्यधिकम् ङ. 14. हलादौ – जेहीयते नास्ति क. 15. उत्तरार्थः क.